1. **सूचनाम् अनुसर्य लिखतु-** [6]

I. अधोलिखितानां वाक्यानां प्रश्न-सूचक- वाक्यानि लिखन्तु ।
यथा- लेखनी अत्र अस्ति । लेखनी कुत्र अस्ति ?
(क) वृक्षः तत्र अस्ति । ____________ ?
(ख) देवालयः अन्यत्र अस्ति । ____________ ?
(ग) वायुः सर्वत्र अस्ति । ____________ ?
(घ) बालकाः एकत्र तिष्ठन्ति । ____________ ?

**Ans. :** (क) वृक्षः कुत्र अस्ति ?
(ख) देवालय : कुत्र अस्ति ?
(ग) वायुः कुत्र अस्ति ?
(घ) बालकाः कुत्र तिष्ठन्ति ?

II. उत्पीठिकायां किम् अस्ति ? किं नास्ति ? इति चित्रं दृष्ट्वा लिखन्तु |
यथा - उत्पीठिकायां पुस्तकम् अस्ति ।
उत्पीठिकायां घटी नास्ति ।
(लेखनी, चषकः, कूपी, स्यूतः)



**Ans. :** (क) उत्पीठिकायां लेखनी नास्ति ।
(ख) उत्पीठिकायां चषकः नास्ति ।
(ग) उत्पीठिकायां स्यूतः अस्ति ।
(घ) उत्पीठिकायां कूपी अस्ति।

III. अधोलिखितेभ्यः वाक्येभ्यः अव्ययपदानि चित्वा लिखन्तु।
(क) अमितः गृहात् बहिः गच्छति । ____________
(ख) एकः वानरः वृक्षस्य उपरि तिष्ठति । ____________
(ग) सः फलानि अधः क्षिपति । ____________
(घ) तत्र एकः बिडालः अस्ति । ____________

**Ans. :** (क) बहिः
(ग) अधः
(ख) उपरि
(घ) तत्र

* **बहुविकल्पी प्रश्नाः** [10]

2. 'अतिथिदेवो भव' इति पाठस्य क्रमः कः?
(A) पञ्चमः (B) सप्तमः (C) नवमः (D) चतुर्थः

Get More Learning Materials Here : CLICK HERE www.studentbro.in

Ans. : (B) सप्तमः

3. 'अतिथिदेवो भव' इति कस्य वचनम् अस्ति?

(A) रामायणस्य (B) महाभारतस्य (C) कालिदासस्य (D) उपनिषदः

Ans. : (D) उपनिषदः

4. अतिथिसेवा केषु अन्तर्भवति?

(A) पञ्चमहायज्ञेषु (B) नवरत्नेषु (C) वेदेषु (D) नीतिवाक्येषु

Ans.: (A) पञ्चमहायज्ञेषु

5. राधिकायाः गृहे नूतनाः के आसन्?

(A) बालकाः (B) जनाः (C) अतिथयः (D) जीवाः

Ans. : (C) अतिथयः

6. तन्वी आकृत्या कीदृशी आसीत्?

(A) असुन्दरी (B) सुन्दरी (C) कोमला (D) स्थूला

Ans. : (B) सुन्दरी

7. राधिका मार्जार्यै किं ददाति?

(A) जलम् (B) रोटिका (C) मोदकम् (D) क्षीरम्

Ans. : (D) क्षीरम्

8. राधिकां दृष्ट्वा के भीताः न भवन्ति?

(A) शावकाः (B) जनाः (C) पशवः (D) खगाः

Ans.: (A) शावकाः

9. राधिकायाः कार्यकलापान् दृष्ट्वा का हसति?

(A) मातामही (B) माता (C) पितामही (D) मार्जारी

Ans. : (C) पितामही

10. 'मृद्वी स्पर्शेन अतीव कोमला अस्ति।' अत्र अव्ययपदं किम्?

(A) मृद्वी (B) अतीव (C) स्पर्शेन (D) कोमला

Ans. : (B) अतीव

11. राधिकां सधन्यवादं का पश्यति?

(A) तन्वी (B) मातामही (C) पितामही (D) मार्जारी

Ans. : (D) मार्जारी

12. **पाठस्य आधारैण प्रश्नानाम् उत्तराणि एकपदेन लिखन्तु ।** [6]

I. राधिका कथं चलति स्म ?

Ans. : कूर्दमाना

II. गृहे कति अतिथयः सन्ति?

Ans. : पञ्च

Get More Learning Materials Here : CLICK HERE www.studentbro.in

III. कां दृष्ट्वा शावकाः भीताः न भवन्ति ?

**Ans. :** राधिकाम्

IV. मार्जार्याः कति शावकाः ?

**Ans. :** चत्वारः

V. राधिका मार्जार्यै किं ददाति ?

**Ans. :** क्षीरम्

VI. चित्रवर्णः कः अस्ति ?

**Ans. :** शबलः

13. **पाठस्य आधारेण प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखन्तु ।** **[12]**

I. मार्जारीशावकानां नामानि कानि ?

**Ans. :** मार्जारीशावकानां नामानि तन्वी, मृद्वी, शबलः भीमः च इति ।

II. राधिका मार्जारीशावकान् किं पाठयति ?

**Ans. :** राधिका मार्जारीशावकान् पाठयति - जानन्ति किम् ? अतिथिदेवो भव। भवन्तः अपि वदन्तु - 'अतिथि देवो भव'।

III. विशिष्टाः अतिथयः के?

**Ans. :** काचित् मार्जारी तस्याः चत्वारः शावकाः च विशिष्टाः अतिथयः ।

IV. पितामही राधिकां किं वदति ?

**Ans. :** पितामही राधिकां वदति - राधिके ! अतिथयः कदा आगच्छन्ति इति न जानीमः । किन्तु यदा ते अत्र आगच्छन्ति तदा तेषाम् एतादृशी सेवा करणीया ।

V. मार्जारी कदा राधिकायाः पृष्ठतः आगच्छति ?

**Ans. :** यदा राधिका शावकानां समीपं गच्छति चेत् मन्दं मन्दं पृष्ठतः मार्जारी आगच्छति ।

VI. मार्जार्याः शावकाः कीदृशाः सन्ति?

**Ans. :** तन्वी आकृत्या सुन्दरी, मृद्वी स्पर्शेन अतीव कोमला, शबलः चित्रवर्णः तथा च भीमः किञ्चित् स्थूलः । मार्जार्याः शावकाः एतादृशाः सन्ति ।

* **उचितैः अर्थैः सह मेलनं कुरुत-** **[4]**

14.

| 'क' | 'ख' |
|---|---|
| (i) अहोरात्रम् | शनैः शनैः |
| (ii) मन्दं-मन्दम् | अहर्निशम् |
| (iii) वारं-वारम् | सम्पूर्ण दिनम् |
| (iv) आदिनम् | पुनः पुनः |

**Ans. :**

| 'क' | 'ख' |
|---|---|
| (i) अहोरात्रम् | अहर्निशम् |
| (ii) मन्दं-मन्दम् | शनैः शनैः |

Get More Learning Materials Here : CLICK HERE www.studentbro.in

| | |
|---|---|
| (iii) वारं-वारम् | पुनः पुनः |
| (iv) आदिनम् | सम्पूर्ण दिनम् |

15. **गद्यांशं पठित्वा प्रश्नान् उत्तरत-** **[6]**

I. राधिका एषु दिनेषु कूर्दमाना एव चलति । यतः गृहे नूतनाः अतिथयः सन्ति । ते च विशिष्टाः सन्ति । माता, पुत्रौ पुत्र्यौ च मिलित्वा ते तत्र पञ्च सन्ति । अहोरात्रं तस्याः चिन्ता एकत्र एव । गृहस्य छद्याः उपरि । तत्र एव तस्याः मनः अस्ति । कुतूहलम् अस्ति के ते इति ? ते न अन्ये, काचित् मार्जारी तस्याः चत्वारः शावकाः च। आम्, एव विशिष्टाः अतिथयः । सा तु तेषां नामानि अपि चिन्तितवती – तन्वी, मृद्वी, शबलः, भीमः च इति ।

**I. एकपदेन उत्तरत-**

(i) मार्जार्याः कति शावकाः ?

(ii) चित्रवर्ण : का अस्ति ?

**II. पूर्णवाक्येन उत्तरत-**

(i) विशिष्टाः अतिथयः के सन्ति?

**III. निर्देशानुसारं उत्तरत-,**

(i) 'विशिष्टः' इति पदस्य विलोमशब्द लिखत |

(क) सामान्यः (ख) अतिविशिष्य् (ग) उच्चतर (घ) निम्नतर

(ii) 'शावकाः' इत्यत्र का विभक्तिः ?

(क) द्वितीया (ख) प्रथमा (ग) तृतीया (घ) षष्ठी

**Ans. :** I. (i) चत्वारः (ii) शबलः

II. मार्जारी, तस्याः चत्वारः शावकाः च विशिष्टाः अतिथयः सन्ति ।

III. (i) (क) सामान्यः (ii) (ख) प्रथमा

----- -----

Student Bro

Get More Learning Materials Here : CLICK HERE www.studentbro.in